"तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रञ्च महानरकमेव च ॥")

महानलः, पुं, ( महांश्चासौ नलश्चेति । ) देवनलः । इति राजनिर्घण्टः ॥ ( महांश्चासौ अनलश्चेति । ) वृहदग्निश्च ॥

महानवमी, स्त्री, ( महती चासौ नवमी चेति ।) आश्विनशुक्लनवमी । यथा,—
श्रीभगवानुवाच ।
"दुर्गातन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम् ।
महानवम्यां शरदि बलिदानं नृपादयः ॥
आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः ।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा ॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता ।
सा तिथिः सर्व्वलोकानां पूजनीया शिवाप्रिया ॥"
इति कालिकापुराणे ५७ अध्यायः ॥
अपि च ।
"प्रावृट्काले विशेषेण आश्विने त्वष्टमीषु च ।
महाशब्दो नवम्यान्तु लोके ख्यातिं गमिष्यति ॥"
इति तिथ्यादितत्त्वम् ॥

महानसं, क्ली, ( महच्च तत् अनश्चेति । + "अनोऽश्मायःसरसां जातिसंज्ञयोः ।" ५ । ४ । ६४ । इति संज्ञायां टच् । "आन्महतः समानाधिकरणजातीययोः ।" ६ । ३ । ४६ । इति महत आकारादेशः । ) रन्धनगृहम् । तत्पर्य्यायः । रसवती २ पाकस्थानम् ३ । इत्यमरः । २ । ६ । २७ ॥ ( तथास्य लक्षणं यथा,—
"प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ।
सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् ॥
विकक्षव्यस्तसंहृष्टं सवितानं कृतार्च्चनम् ।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥
तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम् ।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंवृताः ॥
तस्य चाज्ञा विधेयाः स्युर्व्विविधाः परिकर्म्मिणः ।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः ॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् ।
माहानसिकवोढारः सौपौदनिकपौपिकाः ।
भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन ॥"
इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये ॥)
तद्विवरणं यथा,—
"आग्नेय्यां दिशि कर्त्तव्यमावासस्य महानसम् ।
गवाक्षजालमार्गाय स्वच्छभित्त्युपलेपितम् ॥
चुल्ली तत्र प्रकर्त्तव्या पूर्व्वपश्चिममायता ।
न्यस्तव्यादीनि भाण्डानि क्षालितानि च वारिणा ॥
तेषु यत् पच्यते द्रव्यं गुणवत् सर्व्वसम्मतम् ।
तदभावे पचेल्लौहे चतुरर्थविकारजित् ॥
कांस्यजे पाचितं यद्धि तद्धितं मतिदं शुचि ।
यच्च ताम्रमये सिद्धं न रुच्यं तन्नपित्तकृत् ॥
सौवर्णे राजते पाच्यमाढ्यभूमिभृतां गृहे ।
तत्पात्रं सर्व्वदोषघ्नं धिषणोत्सवदायकम् ॥"
अथ महानसोपयोग्योपकरणानि ।
"वस्तूनि भोजनार्हाणि विविधानि पुनः पुनः ।
सर्व्वाणि गुणयुक्तानि स्थापितानि महानसे ॥
दास्यासमार्ज्जनी वाढ़ा पूतच्छन्नी सकूर्च्चिका ।
कर्षणी वैणवं पात्रं जलपूर्णस्तलिञ्जरः ॥
वह्निसंजननी ग्रावः कुद्दालं सकुठारकः ।
दारुखण्डानि शुष्काणि हस्तमात्राणि चेन्धनम् ॥
अजीर्णान्यनतिस्थूलान्यजन्तून्यमलानि च ।
तितउश्चालनी पीठो मुषलं चाप्युदूखलम् ॥
सर्पकोद्घृष्टिका दर्व्वी चतुरस्रावपट्टिका ।
संदंशकस्तु युगलं वस्त्रखण्डचतुष्टयम् ॥
नालिका च्छुरिका चैव सुस्थूलं सुकटाहकम् ॥
वह्निसञ्चालनार्थाय दर्व्वी दीर्घा सुलौहजा ॥
तन्दूरभर्ज्जरी स्रावा तप्तकं हढ़वेष्टनी ।
इत्यादि वस्तुजातं हि युज्यते च महानसे ॥"
इति पाकराजेश्वरः ॥
तत्र रक्षणीया जना यथा,—
"सूदशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सर्व्वे महानसे धार्य्या लुप्तकेशनखा जनाः ॥"
इति मात्स्ये १८६ अध्यायः ॥
महानसोऽपि पुंसि । इत्यमरटीकायां रमानाथः ॥

महानाटकं, क्ली, ( महच्च तत् नाटकञ्चेति । ) नाटकविशेषः । तस्य लक्षणं यथा,—
"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमाचिरे ।
एतदेव नाटकम् । यथा, बालरामायणम् ।"
इति साहित्यदर्पणः ॥ स्वनामख्यातहनूमद्रचितरामचरितग्रन्थविशेषः । यथा,—
"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ।
मिश्रश्रीमधुसूदनेन कविना सन्दर्भ्य सज्जीकृते
स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क एवेत्यसौ ॥"
इति तस्यान्तिमः श्लोकः ॥

महानाड़ी, स्त्री, ( महती चासौ नाड़ी चेति ।) कण्डरा । इति राजनिर्घण्टः ॥ ( विवरणमस्याः कण्डराशब्दे ज्ञेयम् ॥ )

महानादः, पुं, ( महान् नादोऽस्य । ) हस्ती । वर्षुकमेघः । (महांश्चासौ नादश्चेति । ) महाशब्दः । इति मेदिनी । दे, ५१ ॥ ( यथा, महाभारते । ५ । ६६ । २ ।
"इदमद्भिः समं प्राप्ता ये केचिद्भुवनद्रुमाः ।
प्रविशन्तो महानादं नदन्ति भयपीड़िताः ॥")
सिंहः । कर्णः । इति हेमचन्द्रः ॥ उष्ट्रः । शङ्खः । इति राजनिर्घण्टः ॥ काहलवाद्यम् । इति हारावली ॥ ( महादेवः । यथा, महाभारते । १३ । १७ । ४८ ।
"निशाचरः प्रेतचारी भूतचारी महेश्वरः ।
कालयोगी महानादः सर्व्वकामचतुष्पथः ॥"
महाशब्दयुक्ते, त्रि । यथा, रामायणे । ४ । ४० । ३८ ।
"तत्कालमेव प्रतिमं महोरगनिषेवितम् ।
अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥")

महानिद्रा, स्त्री, ( महती सुदीर्घा चासौ निद्रा चेति । ) मरणम् । इति जटाधरः ॥

महानिम्बः, पुं, ( महांश्चासौ निम्बश्चेति । ) निम्बवृक्षविशेषः । घोड़ा निम इति भाषा । तत्पर्य्यायः । कैटर्य्यः २ पवनेष्टः ३ पार्व्वतः ४ । इति रत्नमाला ॥ ( यथा,—
"मृतसूताभ्रनागञ्च स्वर्णं तुल्यं प्रकल्पयेत् ।
महानिम्बस्य चूर्णेन्तु चतुर्भिः सममाहरेत् ।
मधुना लेहयेन्नाषं लालामेहप्रशान्तये ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)
अस्य गुणाः । परमग्राहित्वम् । कषायत्वम् । अम्लत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥ ( तथास्य पर्य्यायान्तरं गुणाश्च ।
"महानिम्बः स्मृतोद्रेका रम्यको विषमुष्टिकः ।
केशमुष्टिर्निम्बकश्च कार्म्मुको जीव इत्यपि ॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित् ।
प्रमेहश्वासगुल्मार्शो मूषिकाविषनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महानिशा, स्त्री, ( महती घोरा निशा । ) निशामध्यभागः । तत्पर्य्यायः । निशार्द्धः २ निशीथः ३ । इति हेमचन्द्रः । २ । ५६ ॥ * ॥
स्मृत्युक्तमहानिशा सार्द्धप्रहरोपरि प्रहरद्वयम् ।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तत्र स्नानं न कुर्व्वीत काम्यनैमित्तिकादृते ॥"
इति रघुनन्दनभट्टाचार्य्यधृतवचनात् ।
महानिशापरकालस्य नाड़ीचतुष्टयस्य परदिनादित्वेन तदानीं पूर्व्वदिवसीयभोजनानुपपत्तेः । तद्दिनव्रतलोपापत्तेश्चेति तिथितत्त्वीयलिखनस्वरसाच्च ॥ * ॥ तत्र भक्षणनिषेधो यथा,—
"चतुर्मुहूर्त्ते व्यतीते तु रात्रावेव महानिशा ।
लभते भक्षणाच्च तत्र मुक्ता च नारद ! ॥
नीमांसविड्भसमं ताम्बूलञ्च फलं जलम् ।
पुंसामभक्ष्यं शुद्धायामोदनस्यापि का कथा ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥
तत्र पारणनिषेधो यथा,—
"न रात्रौ पारणं कुर्य्यादृते वै रोहिणीव्रतात् ।
निशायां पारणं कुर्य्याद्वर्ज्जयित्वा महानिशाम् ॥
महानिशायां प्राप्तायां तिथिभान्तं यदा भवेत् ।
तृतीयेऽह्नि मुनिश्रेष्ठ ! पारणं कुरुते व्रती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥
देवलोक्ता महानिशा रात्रिमध्यमदण्डद्वयात्मिका । सा द्वितीयप्रहरशेषदण्डतृतीयप्रहर-